संस्कृत.

क्रं. नं. ५९

स्तोत्र

~~पौराणिक.~~

# शिवसहस्रनामावली

६१८/स्तो. ३८४

व ३८५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

अथशिवसहस्रनाम प्रारंभोयं॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

शि॰ स॰ श्रीगणेशायनमः॥वासुदेवउवाच॥ततःसप्रयतोभूत्वाममतात्तयुधि स्त॰ ना॰
१ ष्ठिर॥प्रांजलिःप्राहविप्रर्षिर्नामसंग्रहमादितः॥१॥उपमन्युरुवाच॥ब्र
ह्मप्रोक्तैरृषिप्रोक्तैर्वेदवेदांगसंभवैः॥सर्वलोकेषुविख्यातंस्तुत्यंस्तो
ष्यामिनामभिः॥२॥महद्भिर्विहितैःसत्यैःसिद्धैःसर्वार्थसाधकैः॥ऋ
षिणातंडिनाभक्त्याकृतैर्वेदकृतात्मना॥३॥यथोक्तैःसाधुभिःख्यातै
र्मुनिभिस्तत्वदर्शिभिः॥प्रवरंप्रथमंस्वर्ग्यंसर्वभूतहितंशुभं॥४॥श्रुतैः
सर्वत्रजगतिब्रह्मलोकावतारितैः॥सत्यैस्तत्परमंब्रह्मब्रह्मप्रोक्तैः
सनातनं॥५॥वक्ष्येयदुकुलश्रेष्ठशृणुष्वावहितोमम॥वरयैनंभवं
देवंभक्तस्त्वंपरमेश्वरं॥६॥तेनतेश्रावयिष्यामियत्तद्ब्रह्मसनातनं॥ १

(2A)

न शक्यं विस्तारात् कात्स्न्येन वक्तुं शर्वस्य केनचित् ॥ ७ ॥ युक्तेनापि विभूती
नामपि वर्षशतैरपि ॥ यस्यादिर्मध्यमंतं च सुरैरपि न गम्यते ॥ ८ ॥ कस्तस्य
शक्नुयाद्वक्तुं गुणान् कात्स्न्येन माधव ॥ किं तु देवस्य महतः संक्षिप्तार्थ
पदाक्षरं ॥ ९ ॥ शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य धीमतः ॥ अप्राप्य तु
ततोनुज्ञां न शक्यः स्तोतुमीश्वरः ॥ १० ॥ यदा तेनाभ्यनुज्ञातः स्तुतो वै
स तदा मया ॥ अनादिनिधनस्याहं जगद्योने महात्मनः ॥ ११ ॥ नाम्नां
कंचित्समुद्देशं वक्ष्याम्यव्यक्तयोनिनः ॥ वरदस्य वरेण्यस्य विश्वरू
पस्य धीमतः ॥ १२ ॥ शृणु नाम्नां चयं कृष्ण यदुक्तं पद्मयोनिना ॥ द

(३)
त्रि॰
२

त्रानामसहस्राणियान्याहप्रपितामहः॥१३॥तानिनिर्मथ्यमनसादध्नोघृत स॰ ना॰
मिवोद्धृतं॥गिरेःसारंयथाहेमपुष्पसारंयथामधु॥१४॥घृतात्सारंयथामं
डस्तथैतत्सारमुद्धृतं॥सर्वपापापहमिदंचतुर्वेदसमन्वितं॥१५॥प्रयत्नेना
धिगंतव्यंधार्यंचप्रयतात्मना॥मंगल्यंपौष्टिकंचैवरक्षोघ्नंपावनंमह
त्॥१६॥इदंभस्यापदातव्यंश्रद्दधानास्तिकायच॥नाश्रद्दधानरूपाय
नास्तिकायाजितात्मने॥१७॥यस्त्वभ्यसूयतेदेवंकारणात्मानमीश्वरं॥स
कृष्णनरकंयातिसहपूर्वैःसहात्मजैः॥१८॥इदंध्यानमिदंयोगमिदंध्ये
यमनुत्तमं॥इदंजप्यमिदंज्ञानंरहस्यमिदमुत्तमं॥१९॥यंलब्ध्वाअंतका

२

(3A)

ऽपि गच्छेत परमां गतिं ॥ पवित्रं मंगलं मेध्यं कल्याणमिदमुत्तमं ॥ २०॥ इदं ब्र
ह्म पुरा कृत्वा सर्वलोकपितामहः ॥ सर्वस्तवानां राजत्वे दिव्यानां समकल्प
यत् ॥ २१॥ तदाप्रभृति चैवायमीश्वरस्य महात्मनः ॥ स्तवराज इति ख्या
तो जगत्यमरपूजितः ॥ २२॥ ब्रह्मलोकादयं स्वर्गे स्तवराजोवतारितः ॥
यतस्तंडिः पुरा प्राप तेन तंडिकृतोभवत् ॥ २३॥ स्वर्गाच्चैवात्र भूर्लोकं तं
डिनात्यवतारितः ॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनं ॥ २४॥ निग
दिष्ये महाबाहो स्तवानामुत्तमं स्तवं ॥ ब्रह्मणामपि यद्ब्रह्म पराणा
मपि यत्परं ॥ २५॥ तेजसामपि यत्तेजस्तपसामपि यत्तपः ॥ शांतानां

(८)

शि॰ स॰
३

मप्रियः शांतो लोकधृतीनामप्रियो धृतिः ॥२६॥ दांतानामप्रियो दांतो धीम नाम
तां नामप्रियावधीः ॥ देवानामप्रियो देवः ऋषीणामप्रियस्त्वृषिः ॥२७॥
यतानामप्रियो यतिः शिवानां नामप्रियः शिवः ॥ रुद्राणामप्रियो रुद्र
प्रभाप्रभव नामपि ॥२८॥ योगिनां नामप्रियो योगी कारणानांच का
रणं ॥ यतो लोके संभवंति नसंभवंति मतः पुनः ॥२९॥ सर्वभूतात्म
भूतस्य हरस्यामिततेजसः ॥ [illegible]रसहस्रं तु नाम्नां शिवस्य मे
शृणु ॥ यच्छ्रुत्वा मनुजव्याघ्र सर्वान्कामानवाप्स्यसि ॥३०॥ ओं
स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः ॥ सर्वात्मा सर्वविख्यातः ३

(4A)

सर्वः सर्वकरोभवः ॥२१॥ जटीचर्मीशिखंडीचसर्वांगः सर्वभावनः ॥ हर
श्चहरिणाक्षश्चसर्वभूतहरः प्रभुः ॥२२॥ प्रवृत्तिश्चनिवृत्तिश्चनियतः शा
श्वतोध्रुवः ॥ स्मशानवासीभगवान्खचरोगोचरोर्दनः ॥२३॥ अभिवा
द्योमहाकर्मातपस्वीभूतभावनः ॥ उन्मत्तवेषप्रछन्नः सर्वलोकप्रजा
पतिः ॥२४॥ महारूपोमहाकायोवृषरूपोमहायशाः ॥ महात्मासर्वभू
तात्माविश्वरूपोमहाहनुः ॥२५॥ लोकपालोंतर्हितात्माप्रसादोहयग
र्द्दभिः ॥ पवित्रंचमहांश्चैवनियमोनियमाश्रितः ॥२६॥ सर्वकर्मास्व
यंभूतआदिरादिकरोनिधिः ॥ सहस्राक्षोविशालाक्षः सोमोनक्षत्र

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

त्रि·स· साधकः॥३७॥चंद्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः॥अत्रिरत्र्यानम नं·
७ स्कर्ता मृगबाणार्पणोऽनघः॥३८॥महातपा घोरतपा अदीनो दीनसाध
कः॥संवत्सरकरो मंत्रः प्रमाणं परमं तपः॥३९॥योगी योज्यो महाबीजो
महारेता महाबलः॥सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः॥४०॥
दशबाहुस्त्वनिमिषो नीलकंठ उमापतिः॥विश्वरूपः स्वयंश्रेष्ठो बल
वीरो बलो गणः॥४१॥गणकर्ता गणपतिः दिग्वासाः काम एव च॥
मंत्रवित्परमो मंत्रः सर्वभावकरो हरः॥४२॥कमंडलुधरो धन्वी
बाणहस्तः कपालवान्॥अशनी शतघ्नी खड्गी पट्टिशी चायुधी ७

(5A)

महान्॥७२॥सुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः॥उष्णीषी च सुवक्त्र
श्च उदग्रो विनतस्तथा॥७३॥दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च॥
शृगालरूपः सिध्धार्थो मुंडः सर्वशुभंकरः॥७४॥अजश्च बहुरूपश्च गंधधा
री कपर्द्यपि॥ऊर्ध्वरेता ऊर्ध्वलिंग ऊर्ध्वशायी नभस्थलः॥७५॥त्रिजटी ची
रवासाश्च रुद्रः सेनापतिर्विभुः॥ अहश्चरो नक्तंचरस्तिग्ममन्युः सुवर्चसः॥
७६॥गजहा दैत्यहा कालो लोकधाता गुणाकरः॥सिंहशार्दूलरूपश्च आ
र्द्रचर्मांबरावृत्तः॥७८॥कालयोगी महानादः सर्वकामश्चतुष्पथः॥
निशाचरः प्रेतचारी भूतचारी महेश्वरः॥७९॥बहुभूतो बहुधरः स्व

(6)

त्रि·स·
५

र्भानुरमितोगतिः॥नृत्यप्रियोनृत्यनर्तीनर्तकःसर्वलालसः॥५०॥घोरो स्त्र·नाम·
महातपाःपाशोनित्योगिरिरुहोनभः॥सहस्रहस्तोविजयोव्यवसायोत्य
निंदितः॥५१॥अधर्षणोधर्षणात्मायज्ञहाकामनाशकः॥दक्षयागाप
हारीचसुसहोमध्यमस्तथा॥५२॥तेजोपहारीबलहामुदितोर्थोजितोव
रः॥गंभीरघोषोगंभीरोगंभीरबलवाहनः॥५३॥न्यग्रोधरूपोन्यग्रोधो
वृक्षकर्णस्थितिर्विभुः॥सुतीक्ष्णदशनश्चैवमहाकायोमहाननः॥५४॥
विष्वक्सेनोहरिर्यज्ञःसंयुगापीडवाहनः॥तीक्ष्णतापश्चहर्यश्वःसहा
यःकर्मकालवित्॥५५॥विष्णुप्रसादितोयज्ञःसमुद्रोवडवामुखः॥ ५

(6A)

हुताशनसहायश्चप्रशांतात्माहुताशनः॥५६॥उग्रतेजामहातेजाजन्योवि
जयकालवित्॥ज्योतिषामयनंसिद्धिःसर्वविग्रहएवच॥५७॥शिखीमुं
डीजटीज्वालीमूर्तिजोमूर्द्धगोबली॥वेणवीपणवीतालीखलीकालकटं
कटः॥५८॥नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयोगमः॥प्रजापतिर्विश्वबाहु
र्विभागःसर्वगोमुखः॥५९॥विमोचनःसुसरणोहिरण्यकवचोद्भवः॥
मेढ्रजोबलचारीचमहीचारीस्रुतस्तथा॥६०॥सर्वतूर्यनिनादीचसर्वातो
द्यपरिग्रहः॥व्यालरूपोगुहावासीगुहोमालीतरंगवित्॥६१॥त्रिदशा
स्त्रिकालधृक्कर्मसर्वबंधविमोचनः॥बंधनस्त्वसुरेंद्राणांयुधिशत्रु

(७)

शि·स
९

विनाशनः॥६२॥सांख्यप्रसादोदुर्वासाःसर्वसाधुनिषेवितः॥प्रस्कंदनोवि
भागज्ञोअतुल्योयज्ञभागवित्॥६३॥सर्ववासःसर्वचारीदुर्वासावासवोमरः॥
हैमोहेमकरोयज्ञःसर्वधारीधरोत्तमः॥६४॥लोहिताक्षोमहाक्षश्चविजया
क्षोविशारदः॥संग्रहोनिग्रहःकर्तासर्पचीरनिवासनः॥६५॥मुख्योमुख्य
श्चदेहश्चकाहलिःसर्वकामदः॥सर्वकालप्रसादश्चसुबलोबलरूपधृ
क्॥६६॥सर्वकामवरश्चैवसर्वदःसर्वतोमुखः॥आकाशनिर्विरूपश्च
निपातीह्यवशःखगः॥६७॥रौद्ररूपोंशुरादित्योबहुरश्मिःसुवर्चसी॥
वसुवेगोमहावेगोमनोवेगोनिशाचरः॥६८॥सर्ववासीश्रियावासीउप

स्व·ना·
९

(7A)

दंष्ट्राकरोकरः॥मुनिरात्म[illegible]निरालोकः संभग्नश्च सहस्रदः॥६९॥पक्षी
चपक्षरूपश्च अतिदीप्तोविशांपतिः॥उन्मादोमदनःकामोश्वत्थोर्थकरो
यशाः॥७०॥वामदेवश्चवामश्च प्राग् दक्षिणश्चवामनः॥सिद्धयोगीमह
र्षिश्चसिद्धार्थःसिद्धसाधकः॥७१॥भिक्षुश्चभिक्षुरूपश्चविपणोमृदुरव्य
यः॥महासेनोविशाखश्चषष्टिभागोगवांपतिः॥७२॥वज्रहस्तश्चविष्कं
भीचमूस्तंभनऽवच॥वृत्तावृत्तकरस्तालोमधुर्मधुकलोचनः॥७३॥वा
चस्पत्योवाजसनोनित्यमाश्रमपूजितः॥ब्रह्मचारीलोकचारीसर्वचा
रीविचारवित्॥७४॥ईशानईश्वरःकालोनिशाचारीपिनाकधृक्॥

(8)

त्रि·स·
५

निमित्तस्थो निमित्तं च नंदिर्नंदिकरो हरिः ॥७५॥ नंदीश्वरश्च नंदी च नंद स्त·ना·
नो नंदिवर्धनः ॥ भगहारी निहंता च कालो ब्रह्मा पितामहः ॥७६॥ चतुर्मुखो
महालिंगश्चारुलिंगस्तथैव च ॥ लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगा
वहः ॥७७॥ बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ॥ इतिहासः सक
ल्पश्च गौतमोऽथ निशाकरः ॥७८॥ दंभो ह्यदंभो वैदंभो वश्यो वश्याकरः ह
रिः ॥ लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ॥७९॥ अक्षरं परमं ब्रह्म
बलवच्छक्र एव च ॥ नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः ॥८०॥
बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ॥ वेदकारो मंत्रकारो वि

७

(8A)

द्दानसमरस्मद्दिनः ॥ ८१ ॥ महामेघनिवासी च महाघोरो वशीकरः ॥ अग्नि
ज्वालो महाज्वालो अतिधूम्रो हुतो हविः ॥ ८२ ॥ वृषणः शंकरो नित्यं वर्च
स्वी धूमकेतनः ॥ नीलस्तथांगलुब्धश्च शोभनो निरवग्रहः ॥ ८३ ॥ स्वस्ति
दः स्वस्तिभावश्च भागी भागकरो लघुः ॥ उत्संगश्च महांगश्च महागर्भप
रायणः ॥ ८४ ॥ कृष्णवर्णः सुवर्णश्च इंद्रियं सर्वदेहिनां ॥ महापादो म
हाहस्तो महाकायो महायशाः ॥ ८५ ॥ महामूर्ध्या महामात्रो महानेत्रो नि
शालयः ॥ महांतको महाकर्णो महोष्ठश्च महाहनुः ॥ ८६ ॥ महानासो म
हाकंबुर्महाग्रीवः श्मशानभाक् ॥ महावक्षा महोरस्को ह्यंतरात्मा म

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(१)

शि·स· गालयः॥८७॥लंबनोलंबितोष्ठश्चमहामायःपयोनिधिः॥महादंतोमहा स्व·ना·

८ दंष्ट्रोमहाजिव्होमहामुखः॥८८॥महानखोमहारोमामहाकोशोमहा

जटः॥प्रसन्नश्चप्रसादश्चप्रत्ययोगिरिसाधनः॥८९॥स्नेहनोस्नेहन

श्चैवअजितश्चमहामुनिः॥वृक्षाकारोवृक्षकेतुरनलोवायुवाहनः॥

९०॥गंडलीमेरुधामाचदेवाधिपतिरेवच॥अथर्वशीर्षःसामास्यऋक्

सहस्रामितेक्षणः॥९१॥यजुःपादभुजोगुह्यःप्रकाशोजंगमस्तथा॥अ

मोघार्थःप्रसादश्चअभिगम्यःसुदर्शनः॥९२॥उपकारःप्रियःसर्वःकन

कःकांचनछविः॥नाभिर्नंदिकरोभावःपुष्करस्थपतिःस्थिरः॥९३॥ ८

(9A)

नः

द्वादशात्मासनश्चाघोयहोपहृसमाहिः॥नचक्रेकलिश्चकालश्चमकरः
कालपूजितः॥७४॥सगणोगणकाकारश्चभूतवाहनसारथिः॥भस्मशा
गो३ योभस्मगोप्ताभस्मभूतस्तरुर्गणः॥७५॥लोकपालस्तथालोकोमहात्मा
सर्वपूजितः॥शुक्लस्त्रिशुक्लःसंपन्नःशुचिर्भूतनिषेवितः॥७६॥आ
श्रमस्थःक्रियावस्थोविश्वकर्ममतिर्वरः॥विशालशाखःस्ताम्रो
ष्ठोत्यंबुजालःसुनिश्चलः॥७७॥कपिलःकपिशःशुक्लआयुश्चैवपरो
परः॥गंधर्वोत्यदितिस्तार्क्ष्यःसुविज्ञेयःसुशारदः॥७८॥परश्वधायुधो
देवोअनुकारीसुबांधवः॥तुंबवीणोमहाक्रोधऊर्ध्वरेताजलेशयः॥७९॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

उग्रो वंशकरो वंशो वंशानादो ह्यनिंदितः ॥ सर्वांगरूपो मायावी सुहृ स्वना·
दो ह्यनिलो नलः ॥ १०० ॥ बंधनो बंधकर्ता च सुबंधनविमोचनः ॥ स
यज्ञारिः सकामारिर्महादंष्ट्रो महायुधः ॥ १०१ ॥ बहुधा निंदितः शर्वः
शंकरः शंकरोधनः ॥ अमरेशो महादेवो विश्वदेवः सुरारिहा ॥ १०२ ॥
अहिर्बुध्न्यो निर्ऋतिश्च चेकितानो हरिस्तथा ॥ अजैकपाच्च का
पाली त्रिशंकुरजितः शिवः ॥ १०३ ॥ धन्वंतरिर्धूमकेतुः स्कंदो वैश्र
वणस्तथा ॥ धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥ १०४ ॥ प्र
भावः सर्वगो वायुरर्यमा सविता रविः ॥ उषंगुश्च विधाता च मांधा

(10A)

ताभूतभावनः॥१०५॥ विभुर्दीपो विभावी च सर्वकामगुणावहः॥ पद्म
नाभो महागर्भश्चंद्रवक्त्रोनिलोनलः॥१०६॥ बलवांश्चोपशांतश्च पु
राणः पुण्यचंचुरी॥ कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः॥१०७॥ स
र्वाशयो दर्भचारी सर्वेषां प्राणिनां पतिः॥ देवदेवः सुखासक्तः सद
सवसुर्वरत्नवित्॥१०८॥ कैलासगिरिवासी च हिमवद्गिरिसंश्रयः॥
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः॥१०९॥ वणिजो वर्धकी वृक्षो
बकुलश्चंदनश्छदः॥ सारग्रीवो महाजत्रुरलोलश्च महौषधः॥११०॥
सिद्धार्थकारी सिद्धार्थः छंदोव्याकरणोत्तरः॥ सिंहनादः सिंहदंष्ट्रः

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com